श्री श्यामला पंचाशत्स्वरवर्णमालिका स्तोत्रं

श्री श्यामला पंचाशत्स्वरवर्णमालिका स्तोत्रं

वंदेऽहं वनजेक्षणां वसुमतीं वाग्देवि तां वैष्णवीं
शब्दब्रह्ममयीं शशांकवदनां शातोदरीं शांकरीं |
षड्बीजां सशिवां समंचितपदामाधारचक्रेस्थितां
चिद्रूपां सकलेप्सितार्थवरदां बालां भजे श्यामलां || 1 ||

बालां भास्करभासमप्रभयुतां भीमेश्वरीं भारतीं
माणिक्यांचितहारिणीमभयदां योनिस्थितेयं पदां |
ह्रां ह्रां ह्रीं कमयीं रजस्तमहरीं लंबीजमोंकारिणीं
चिद्रूपां सकलेप्सितार्थवरदां बालां भजे श्यामलां || 2 ||

डं ढं णं त थमक्षरीं तव कळांताद्याकृतीतुर्यगां
दं धं नं नवकोटिमूर्तिसहितां नादं सबिंदूकलां |
पं फं मंत्रफलप्रदां प्रतिपदां नाभौ सचक्रेस्थितां
चिद्रूपां सकलेप्सितार्थवरदां बालां भजे श्यामलां || 3 ||

कं खं गं घ मयीं गजास्यजननीं गानप्रियामागमीं
चं छं जं झं झण क्वणि घणु घिणू झंकारपादां रमां |
जं टं ठं हृदये स्थितां किणिकिणी नादौ करौ कंकणां
चिद्रूपां सकलेप्सितार्थवरदां बालां भजे श्यामलां || 4 ||

अं आं इं इमयीं इहैव सुखदामीकार उ ऊपमां
ऋं ॠं लुं सहवर्णपीठनिलये लूंकार एं ऐं सदा |
ॐ औं अन्नमये अः स्तवनुतामानंदमानंदिनीं
चिद्रूपां सकलेप्सितार्थवरदां बालां भजे श्यामलां || 5 ||

हं क्षं ब्रह्ममयीं द्विपत्रकमलां भ्रूमध्यपीठेस्थितां
इडापिंगळमध्यदेशगमनामिष्टार्थसंदायिनीं |
आरोहप्रतिरोहयंत्रभरितां साक्षात्सुषुम्ना कलां
चिद्रूपां सकलेप्सितार्थवरदां बालां भजे श्यामलां || 6 ||

ब्रह्मेशादि समस्त मौनिऋषिभिर्देवैः सदा ध्यायिनीं
ब्रह्मस्थाननिवेशिनीं तव कलां तारं सहस्रांशके |
खव्यं खव्यमयीं खगेशविनुतां खं रूपिमोंकारिणीं
चिद्रूपां सकलेप्सितार्थवरदां बालां भजे श्यामलां || 7 ||

चक्राण्ये सतु सप्तमंतरगते वर्णात्मिके तां श्रियं
नादं बिंदुकलामयींश्वरहिते निःशब्द निर्व्यापके |
निर्व्यक्तां च निरंजनीं निरवयां श्रीयंत्रमात्रां परां
चिद्रूपां सकलेप्सितार्थवरदां बालां भजे श्यामलां || 8 ||

बालामालमनोहरां प्रतिदिनं वांछंति वाच्यं पठेत्
वेदे शास्त्र विवादकालसमये स्थित्वा सभामध्यमे |
पंचाशत्स्वरवर्णमालिकमियां जिह्वाग्र संस्था पठे-
-द्धर्मार्थाखिलकामविक्षितकृपाः सिध्यंति मोक्षं तथा || 9 ||

इति श्री श्यामला पंचाशत्स्वरवर्णमालिका स्तोत्रं |